श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
श्रीमद्वेदान्तदेशिक विरचितं महाकाव्यं

# ॥ यादवाभ्युदयम् ॥

## ॥ एकादशः सर्गः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ यादवाभ्युदयम् ॥

## ॥ एकादशः सर्गः ॥

तदद्भुतं क्रीडितकं क्रमेण
श्रुत्वा हरेरप्रतिमानशक्तेः।
महाबलान् कंसवधादिजन्मा
मन्युः प्रपेदे मगधेन्द्रमुख्यान्॥ ११.१ ॥

गोपालडिम्भो नरपालहन्ता
कुले यदोरञ्चितमातपत्रम्।
अन्यच्च भूम्यामधरोत्तरत्वं
हन्तेति वादान् प्रभुरभ्यनन्दत्॥ ११.२ ॥

हलादिभिर्हेतिवरैर्यथार्हं
रथाङ्गमुख्यैरपि रामकृष्णौ।
स्ववृत्तियोग्यावसरोपयातैः
प्राचीं श्रियं प्रादुरभावयेताम्॥ ११.३ ॥

स दैत्यजिद्वध्यवरूथिनीनां
सम्प्रापकं सारथिमात्रशेषम्।
पुनः प्रवृत्तानुशयः पुरीं स्वां
निन्ये जरासंधमहार्यसंधः॥ ११.४ ॥

समाहृतैः सैन्यमहासमुद्रैः
आयातमष्टादश साम्परायान्।
देहावशेषं प्रजिघाय दीनं
देहेन भीमेन विभेत्तुमिच्छन्॥ ११.५ ॥

स्वदत्तशक्त्या मुचुकुन्ददृष्ट्या
भस्मावशेषो भविता द्रुतं यः।

कलेरिवात्मानमनन्तदोषं
यं कालपूर्वं यवनं प्रचख्युः॥ ११.६ ॥

बलस्य च स्वस्य च बाहुभूम्ना
यदाहृतम्लेच्छमृगाधिपानाम्।
सहस्रकोटीगुणितं सहस्रं
पञ्चत्वमायास्यति पञ्चसङ्ख्यम्॥ ११.७ ॥

तदागमे यादवपुङ्गवानां
विप्रावमानोपनतं विषादम्।
निवारयामास न वासुदेवः
प्रख्यापयन् ब्राह्ममृषेः प्रभावम्॥ ११.८ ॥

निसर्गनिध्येयपरावरः सः
संमन्त्र्य सार्धं यदुवंशवृद्धैः।
विहातुमिच्छन् मधुरां शुभंयुः
सङ्कल्पयामास पुरीं तदन्याम्॥ ११.९ ॥

स्वयं प्रवृत्तैरपि वृष्णवीरैः
त्रातुं क्षमां त्रासितदैत्यलोकः।
अनन्यसाधारणशक्तिरन्यां
सङ्कल्पयामास पुरीमपूर्वाम्॥ ११.१० ॥

जहौ धरित्रीमिव जामदग्न्यः
कौलीमयोध्यामिव कोसलेन्द्रः।
अचिन्त्यवृत्तिर्मधुरामनिन्द्यां
तज्जन्मजातो महिमा तु नैनाम्॥ ११.११ ॥

परित्यजन्नप्यभिमत्य तिष्ठन्
व्याप्तः शुभं व्यक्तिपदं तदग्र्यम्।
अनन्यभाजामभजत् स देवः
तस्मिन् सतां प्रागिव सन्निधानम्॥ ११.१२ ॥

अहंसपद्मामिव वाहिनीं तां
वीतेन्दुतारामिव वासतेयीम्।
समाप्तकार्यामिव सत्रशालां
शून्यां पुरीं प्रेक्ष्य जगाम शौरिः॥ ११.१३॥

चित्रावशेषद्विरदाश्वयोधा
शुकादिसम्भाषणशेषसूक्ता।
मणिप्रभाशेषितदीपिका सा
नाम्नैव माधुर्यवती तदाऽऽसीत्॥ ११.१४॥

प्राचीनमादृत्य निवासभूमिं
प्रत्यङ्मुखीं पद्धतिमाददाना।
स्थिरं पदं प्राप्तुमियेष सेना
सत्त्वाधिका धीरिव सात्त्वतानाम्॥ ११.१५॥

उत्सारयन् धूलिमिवाग्रयायी
विनिर्दिशन् वासमिवातिदूरात्।
प्रत्युद्गमाय त्वरयन्निवाब्धिं
मरुद्ववौ मन्दविधूतकेतुः॥ ११.१६॥

प्रभूतभीमोन्नतनागनक्रा
पारिप्लवैरूर्मिमती तुरङ्गैः।
अपूर्ववारान्निधिमाव्रजन्ती
स्वयं तथा शौरिचमूरभूत् सा॥ ११.१७॥

समेति मां सात्त्वतवाहिनीयं
सिष्णासया हन्त जिगीषया वा।
इति प्रभूताद्भुतवैभवां ताम्
उपेन्द्रनाथामुदधिः शशङ्के॥ ११.१८॥

गतागतैर्योद्धुमिव प्रवृत्तैः
आसीदतामद्भुतभीमवेगौ।

मिथःप्रतिच्छन्दतया प्रतीक्ष्यौ
    वेलावने सैन्यमहासमुद्रौ॥ ११.१९ ॥

महीयसा सैन्यरवेण सद्यः
    पयोधिरन्तर्हिततीव्रघोषः।
प्रकम्पमानो भृशमाबभासे
    भयेन तुष्णीमिव भाव्यमानः॥ ११.२० ॥

प्रतीक्ष्य सेनामुपधावमानां
    पत्या नदीनां प्रणिधीयमानः।
प्रकाशयन् सर्वजनानुकूल्यं
    समीरणो मन्दतरं चचार॥ ११.२१ ॥

वदान्निव स्वागतमागतेभ्यः
    प्रभूतसंतोषभवैः प्रणादैः।
तरङ्गहस्तप्रहितैः सरस्वान्
    अभ्यर्चयामास यदून् पयोभिः॥ ११.२२ ॥

चिरप्रयातं परिहृत्य शय्याम्
    अभ्यागतं वारिधिरादरेण।
मिथःसमायोजितवीचिहस्तः
    प्रायः प्रभुं प्रार्थयत प्रसादम्॥ ११.२३ ॥

निवेश्य सेनामुदधेः समीपे
    तालाङ्कसम्भावितराजताले।
दयार्द्रमेघोपमदेहभूमा
    विश्वम्भरो विश्रमयाञ्चकार॥ ११.२४ ॥

कदाचिदात्मानमवाप्तरत्नं
    कपालिनं चन्द्रकलावतंसम्।
क्षमं सुभिक्षां च दिवं विधातुं
    ध्यातागतं सिन्धुमथादिदेश॥ ११.२५ ॥

अनारत प्राप्तजयोद्यमानां
धर्मं निजं धारयतां यदूनाम्।
अपत्यरक्षोचितमन्तरीपं
दिव्योपमं देयमिह त्वयेति॥ ११.२६ ॥

स तस्य दिक्पालनिवासकल्पां
विधित्सतो वृष्णिपुरीं विशालाम्।
अगाधपाथः परिखाभिगुप्तं
द्वीपं ददौ दुर्गविधानयोग्यम्॥ ११.२७ ॥

बलोत्तराणामपि बह्वमित्रं
स्फीतं यदूनां कुलमीक्षमाणः।
अवन्ध्ययन् विश्वविदर्थशास्त्रं
दुराक्रमं दुर्गमियेष कर्तुम्॥ ११.२८ ॥

स शासिता शास्त्रमनुप्रतस्थे
कर्माऽऽददे कर्मफलप्रदाता।
प्रभुः स्वबुद्ध्यैव जगन्ति गोप्तुं
कुर्वीत बाह्यैरपि किं न गुप्तिम्॥ ११.२९ ॥

प्रभूतरत्नद्युतिकेसरं तत्
प्रवालपत्रौघपरीतपार्श्वम्।
स्थानं हरेरिष्टतमं तदासीत्
सम्भूतिराजीवमिवेन्दिरायाः॥ ११.३० ॥

प्रचोदितस्तत्र च विश्वकर्मा
नाथप्रसत्त्यै नलिनासनाद्यैः।
रथ्यादिवैचित्र्यवतीं वितेने
राशिं गुणानामिव राजधानीम्॥ ११.३१ ॥

स शिल्पविद्यां विधिनोपदिष्टाम्
अशेषतो नूनमधीत्य दाक्ष्यात्।

शुभानि तस्यां भवनानि कर्तुं
सौधेषु दिव्येषु चकार योग्याम्॥ ११.३२॥

गतागतार्थं हरिवाहिनीनां
सेतुं च योगेन बबन्ध सिन्धौ।
चकार दिग्भाग विमूढतां यः
प्रत्यर्थिनां चक्रधर प्रभावात्॥ ११.३३॥

नलेन पूर्वं स्वसुतेन सृष्टात्
नवीनमन्यूनतरं स्वक्लृप्तम्।
समीक्ष्य तुष्यन्नपि विश्वकर्मा
नाथाय रोचेत न वेत्यताम्यत्॥ ११.३४॥

स सेतुरास्कन्दितकूलयुग्मः
सङ्कल्पितो वासवलोकतक्ष्णा।
महापुरीं तां च महीं च मातुं
मध्ये तुलादण्ड इवार्पितोऽभूत्॥ ११.३५॥

निवेदितां निर्जरशिल्पिनैव
स्वयं चमत्कारवता सुक्लृप्ताम्।
अदृष्टपूर्वामिव विश्वदर्शी
दृष्टिः सतां द्रष्टुमियेष नाथः॥ ११.३६॥

निजप्रतिच्छन्दनिदर्शनीयां
मृग्योपमानान्तरमृष्टकान्तिम्।
उदन्वता दत्तकरेण देवः
प्रदर्शितां पूर्वमवैक्षतैनाम्॥ ११.३७॥

अनन्यदृष्टिं नगरी नवीना
विस्मेरतां विश्वपतिं निनाय।
स्वयंप्रभैः सौधभरैरुदारैः
तुङ्गैः सुमेरोरिव रत्नशृङ्गैः॥ ११.३८॥

तामद्भुतां तारकिताग्रसौधां
धर्मस्य पूर्णामिव योगसिद्धिम्।
सपौरभृत्यः समयान्ववेक्षी
विवेश वृष्ण्यन्धकयूथनाथः॥ ११.३९ ॥

परेण नाकं प्रलयानभिज्ञाम्
अधीयते यस्य पुरीमचिन्त्याम्।
स लोकनाथो विदधे सनाथां
दूराधिकां द्वारवतीं दिवोऽपि॥ ११.४० ॥

विधाय यस्यां विदितैः स्वचिह्नैः
यदून् यथास्थान निवेशतुष्टान्।
तामेव नाथःत्रिदशाभिनन्द्यां
त्यक्तामयोध्यां मधुरां च मेने॥ ११.४१ ॥

उदन्वति व्योमतले च लग्नां
दृष्टोभया दर्पणदर्शनीये।
यामद्भुतामात्मपुरीं च देवाः
छायाममन्यन्त मिथः समीक्ष्याम्॥ ११.४२ ॥

प्राकारचक्रं पृथुभिस्तरङ्गैः
आस्फालयन्नम्बुधिरात्तवेगः।
अमर्त्यमुख्यैरपि जातकोपैः
अक्षोभ्यतां व्याकुरुतेव यस्याः॥ ११.४३ ॥

यत्सौधपर्यङ्कजुषां वधूनां
सङ्गृह्य निःश्वासगुणं समीरः।
पद्मेषु नूनं प्रदिशन् प्रभाते
गतागतं याति गवाक्षवर्त्मा॥ ११.४४ ॥

जालानि यत्रागुरुधूमजालैः
संदिग्धपारावतसन्निधानैः।

अवासयन् नूनमहार्यगन्धान्
आसेदुषां नाकसदां विमानान्॥ ११.४५ ॥

परार्थ्यरत्न प्रचितात्मभिर्या
प्रासादमालाभिरलङ्कृताङ्गी।
नाथोपभोगानुगुणां पयोधौ
ननन्द दृष्ट्वैव निजामभिख्याम्॥ ११.४६ ॥

मणिप्रदीप प्रशमप्रयुक्ते
विहारचूर्णे विफले वधूनाम्।
अपत्रपायाः समयेऽपि यस्यां
अभूदनास्था परमार्थदीपे॥ ११.४७ ॥

प्रायेण यत्र प्रमदाजनानाम्
नित्यं गुणैरप्रतिमैर्निरुद्धाः।
संस्कारयोगादपि लब्धसत्त्वाः
चित्रार्पिता नाकसदो विचेरुः॥ ११.४८ ॥

यदन्तरे यामिकवारणानां
आसेदुषामम्बुनिधेरभिख्याम्।
कराभिमर्शेषु पुनश्चकासुः
कल्लोललग्ना इव कर्णशङ्खः॥ ११.४९ ॥

सौधेषु यस्यां युवसेवितेषु
त्रिविष्टपादप्यधिकोन्नतेषु।
व्रीलातिभारान्नमिता इवाऽऽसन्
वैमानिकैरध्युषिता विमानाः॥ ११.५० ॥

न षड्भिरासन् व्यसनानि पुंसां
यद्वासिनामीतिभिरूर्मिभिर्वा।
अयोगयत्नेन विनैव चान्ते
जज्ञे जगद्धातरि बुद्धिरेका॥ ११.५१ ॥

अदेशकालप्रविभागभाजा
भूम्ना जगद्धातुरचिन्त्य भूम्नः।
यस्यां विहारोपवनान्यभूवन्
समाधियोग्यानि तपोवनानि॥ ११.५२॥

अनंहसामध्वरदीक्षितानाम्
आह्वानतः प्रागपि सन्निधानात्।
अभुङ्क्त कृत्स्नानि हवींषि नित्यं
यत्र स्वयं यज्ञतनुः स देवः॥ ११.५३॥

रतिप्रसूता इव राजकन्या
रसोदधेरूर्मिपदं भजन्त्यः।
विरक्तभाव्यं तमवाप्य यस्यां
रागोपपन्ना रमयाम्बभूवुः॥ ११.५४॥

प्रवालचित्रीकृतजालकश्रीः
सालावृता सम्भृतपत्रजाला।
परिष्कृता भद्रमृगादिभिर्या
बभौ स्मरस्येव विहारवन्या॥ ११.५५॥

ध्वजाग्रभिन्नात् तुहिनांशुबिम्बात्
अनुक्षरन्त्या सुधयाऽनुलिप्तैः।
चिरप्रक्लृप्तैरपि यत्र सौधैः
नित्यं नवीनैरिव निर्बभासे॥ ११.५६॥

स्ववैभवैरप्रतिरूपशोभैः
व्यक्तश्रियो वाङ्मनसा निवृत्तैः।
तिरोदधुर्यत्र नरेन्द्रवासाः
स्वयम्प्रभां देवसभां सुधर्माम्॥ ११.५७॥

विभूतिभेदैरनुपप्लवैर्या
भोगार्थिनां भूमिगताप्यभौमैः।

निवारयामास तपोधनानां
वासादरं वासवराजधान्याम्॥ ११.५८ ॥

यत्सौधरत्नप्रकरेषु विष्वक्
प्रसारितैरन्वहमैकमुख्यात्।
करैः सहस्रेण गृहीतदीप्तिः
प्रद्योतते नूनमतीव भास्वान्॥ ११.५९ ॥

यच्चन्द्रशालासु निषेदुषीणां
मृगीदृशां हारमणिप्रकाशैः।
तिरस्क्रियां प्राप्य विलज्जमानाः
तारागणा नूनमधश्चरन्ति॥ ११.६० ॥

गृहेषु यस्यां मणिभित्तिभागे
प्रतिक्षणं दृष्टमुखेन्दुबिम्बः।
वधूजनः केवलमग्रहस्तैः
आदत्त मङ्गल्यतयाऽऽत्मदर्शम्॥ ११.६१ ॥

अनन्तचित्रप्रतिमाभिरामैः
अजस्रमाक्रान्तदिशावकाशैः।
अभावयद्गोपुरवैभवैर्या
विश्वप्रसूतेरिव वैश्वरूप्यम्॥ ११.६२ ॥

सरोभिरुल्लासितपुष्करश्रीः
सङ्गोज्झितैः सङ्गमितप्रयागा।
प्रभासिता रत्नगणांशुभिर्या
धर्माश्रयाणामिव संसदासीत्॥ ११.६३ ॥

हसद्भिरुच्चैःश्रवसं हयाग्र्यैः
एरावतं दन्तिवरैश्च दृप्तैः।
नरोत्तमैर्नाकसदश्च याऽभूत्
सुभ्रूभिरप्यप्सरसः स्वयं द्यौः॥ ११.६४ ॥

वप्रेषु यस्याः स्फटिकप्रदेशान्
द्वाराभिमानात् द्रुतमापतन्तः।
अवापुरागन्तुजनाः सलीलैः
अन्तःस्मितैर्नागरकैर्निरोधम्॥ ११.६५॥

पयोभिरच्छस्फटिकद्रवाभैः
दवीयसां दर्शनमादधानैः।
सुधाधिकस्वादुरसैरविन्दन्
स्वान्तोपमां यत्र सतां सरस्यः॥ ११.६६॥

यामेकचित्तः प्रसमीक्ष्य तुष्यन्
यादोनिधेराहितदिष्टिवृद्धिम्।
लज्जामयासीदिव विश्वकर्मा
लङ्कादिनिर्माणकथाप्रसङ्गे॥ ११.६७॥

समग्ररत्नौघशुभाकृतिं यां
सनायकां मध्यजुषा त्रिधाम्ना।
रम्यां हि हृद्यां हृदयेन नूनं
रत्नाकरो रत्नमधत्त भूषाम्॥ ११.६८॥

अभिन्नसत्वान्नभसः परस्मात्
क्षीरोदधेरंशुमतश्च बिम्बात्।
रमासखस्य प्रणिधानभाजां
याऽभूत् प्रियं व्यक्तिपदं पृथिव्याम्॥ ११.६९॥

यत्सौधभाजां निशि सुन्दरीणां
मुखेन्दुभिश्चुषितकान्तिमिन्दुम्।
सद्यः स्वनिष्यन्दसुधाप्रवाहैः
आप्याययामासुरिवेन्दुकान्ताः॥ ११.७०॥

उद्वेलचञ्चत्तुरगोर्मिमालाम्
उद्घोषितामुत्सवतूर्यघोषैः।

प्रभूतरत्नौघनिधिं पयोधिः
    यामद्भुतां या च तमन्वकार्षीत्॥ ११.७१ ॥

यद्वप्रशैलेषु दिवाऽपि सिन्धोः
    आस्फालनादुत्पतितैः पृषद्भिः।
उत्क्षिप्तमुक्ताफलदर्शनीयैः
    आलक्ष्यतारौघमभूद्विहायः॥ ११.७२ ॥

कलत्रपुत्रादिजुषामजस्रं
    दीर्घायुषां यत्र सतां जनानाम्।
धर्मैकभाजामितरे पुमर्थाः
    प्रायः स्वयं सन्निदधुः स्वभूत्यै॥ ११.७३ ॥

रराज सा रामजनार्दनाभ्यां
    प्राप्तप्रकाशाऽपि यदुप्रवीरैः।
सत्येव तारानिकरे त्रिलोकी
    चक्षुष्मती चन्द्रदिवाकराभ्याम्॥ ११.७४ ॥

प्रभुणा सहस्रवदनेन वर्ण्यतां
    द्विगुणैरमुष्य नयनैरवेक्ष्यताम्।
श्रुतिभिश्च तस्य बहुधा निशम्यताम्
    अधिकां ततः श्रियमवाप सा पुरी॥ ११.७५ ॥

स्वयमजनि किमत्र श्वेतमेवन्तरीपं
    परिणतमुत किञ्चिद्भागधेयं पृथिव्याः।
वरुणनगरमन्यद्वारिधेरुत्थितं वा
    किमिदमिति पुरं तत् कीर्तयन्ति स्म पौराः॥ ११.७६ ॥

रामप्रष्ठैरधिवसति सा राजधानी जगाहे
    लोकाधीशे सह बहुमतैर्लोकपालैरिवान्यैः।
आश्चर्याणां प्रकृतिरियमित्यद्भुतावेशयोग्याम्
    अप्रत्यूहामनितरतुलारोहणीयामभिख्याम्॥ ११.७७ ॥

तन्मध्ये विरचितशिल्पमेरुकल्पं
    वैचित्र्यादपहृतवैजयन्तगर्वम्।
प्रस्पष्टं निजमिव पारमेष्ठ्यमुर्व्यां
    प्रासादं प्रभुरधिवासयाञ्चकार॥ ११.७८ ॥

रामः पुनर्व्रजमुपेत्य विहारभेदैः
    आश्वासयन् सहचरैः सुहृदश्च सर्वान्।
विश्राणितां दुहितरं वरुणेन विन्दन्
    सीरावकृष्टयमुनास्नपितो विजह्रे॥ ११.७९ ॥

प्रत्यञ्चमब्धिमवधूतवतोऽतिदूरं
    दग्धुश्च कूलमिव दक्षिणमस्त्रभूम्ना।
आकर्षतश्च सरितं सवितृप्रसूतां
    रामस्य तस्य शुशुभे रसिकस्य लीला॥ ११.८० ॥

पद्मयोनिवचनादुपनीतां
    प्राक्तनीं प्रियतमामिव कान्तिम्।
रेवतस्य तनयामनुरूपां
    रेवतीं च परिणीय स रेमे॥ ११.८१ ॥

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु यादवाभ्युदये माहाकाव्ये
एकादशः सर्गः ॥